॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

षष्ठकाण्डे चतुर्थः प्रश्नः

सोममन्त्रब्राह्मणनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भि रेवासृजत यदुपयज उपयजति प्रजा एव तद्
यजमानः सृजते जघनार्धादव द्यति जघनार्धाद्धि प्रजाः प्रजायन्ते स्थविमतोऽव द्यति स्थविमतो
हि प्रजाः प्रजायन्तेऽसंभिन्दन्नव द्यति प्राणानामसंभेदाय न पर्यावर्तयति यत् पर्यावर्तयेदुदा-
वर्तः प्रजा ग्राहुकः स्याथ् समुद्रङ्गच्छ स्वाहेत्याह रेत ॥ [१] ॥ एव तद् दधात्यन्तरिक्षङ्गच्छ
स्वाहेत्याहाऽन्तरिक्षेणैवास्मै प्रजाः प्र जनयत्यन्तरिक्षꣳ ह्यनु प्रजाः प्रजायन्ते देवꣳ सवि-
तारङ्गच्छ स्वाहेत्याह सवितृप्रसूत एवास्मै प्रजाः प्र जनयत्यहोरात्रे गच्छ स्वाहेत्याहाहोरात्रा-
भ्यामेवास्मै प्रजाः प्र जनयत्यहोरात्रे ह्यनु प्रजाः प्रजायन्ते मित्रावरुणौ गच्छ स्वाहे ॥ [२] ॥
त्याह प्रजास्वेव प्रजातासु प्राणापानौ दधाति सोमङ्गच्छ स्वाहेत्याह सौम्या हि देवतया प्रजा
यज्ञङ्गच्छ स्वाहेत्याह प्रजा एव यज्ञियाः करोति छन्दाꣳसि गच्छ स्वाहेत्याह पशवो वै छन्दाꣳसि
पशूनेवाव रुन्धे द्यावापृथिवी गच्छ स्वाहेत्याह प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परि
गृह्णाति नभो ॥ [३] ॥ दिव्यङ्गच्छ स्वाहेत्याह प्रजाभ्य एव प्रजाताभ्यो वृष्टिन्नि यच्छत्यग्नि-
व्वैँश्वानरङ्गच्छ स्वाहेत्याह प्रजा एव प्रजाता अस्याम्प्रति ष्ठापयति प्राणानाँव्वा एषोऽव द्यति
योऽवद्यति गुदस्य मनो मे हार्दि यच्छेत्याह प्राणानेव यथास्थानमुप ह्वयते पशोर् वा आलब्धस्य
हृदयꣳ शुगृच्छति सा हृदयशूल ॥ [४] ॥ मभि समेति यत् पृथिव्याꣳ हृदयशूलमुद्वासयेत्

पृथिवीꣳ शुचाऽर्पयेद् यदप्स्वपः शुचा ऽर्पयेच्छुष्कस्य चाऽऽर्द्रस्य च सन्धावुद्वासयत्युभयस्य शान्त्यै यन्द्विष्यात् तं ध्यायेच्छुचैवैनमर्पयति ॥ [५] ॥

(रेतो मित्रावरुणौ गच्छ स्वाहा नभो हृदयशूलं द्वात्रिꣳशच्च) ॥ १ ॥

देवा वै यज्ञमाग्नीध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन् वसतु नु न इदमिति तद् वसतीवरीणाँव्वसतीवरित्वन्तस्मिन् प्रातर् न समशक्नुवन् तदप्सु प्रावेशयन् ता वसतीवरी रभवन् वसतीवरीर् गृह्णाति यज्ञो वै वसती वरीर्यज्ञमेवाऽऽरभ्य गृहीत्वोप वसति यस्यागृहीता अभि निम्रोचेदनारब्धोऽस्य यज्ञः स्याद् ॥ [६] ॥ यज्ञव्विँ च्छिन्द्याज्ज्योतिष्या वा गृह्णीयाद्धिरण्यव्वाँऽवधाय सशुक्राणामेव गृह्णाति यो वा ब्राह्मणो बहुयाजी तस्य कुंभ्यानाङ्गृह्णीयाथ् स हि गृहीतवसतीवरीको वसतीवरीर् गृह्णाति पशवो वै वसतीवरीः पशूनेवाऽऽरभ्य गृहीत्वोप वसति यदन्वीपन्तिष्ठन् गृह्णीयान् निर्मार्गुका अस्मात् पशवः स्युः प्रतीपन्तिष्ठन् गृह्णाति प्रतिरुद्ध्यैवास्मै पशून् गृह्णातीन्द्रो ॥ [७] ॥ वृत्रमहन्थ् सोऽ(१)पोऽ(१)भ्यम्रियत तासाय्यँन्मेद्ध्यय्यँज्ञियꣳ सदेवमासीत् तदत्यमुच्यत ता वहन्तीरभवन् वहन्तीनाङ्गृह्णाति या एव मेद्ध्या यज्ञियाः सदेवा आपस्तासामेव गृह्णाति नान्तमा वहन्तीरतीयाद् यदन्तमा वहन्तीरतीयाद् यज्ञमति मन्येत न स्थावराणाङ्गृह्णीयाद् वरुणगृहीता वै स्थावरा यथ् स्थावराणाङ्गृह्णीयाद् ॥ [८] ॥ वरुणेनास्य यज्ञङ्ग्राहयेद् यद्वै दिवा भवत्यपो रात्रिः प्र विशति तस्मात् ताम्रा आपो दिवा ददृश्रे यन्नक्तम्भवत्यपोऽहः प्र विशति तस्माच्चन्द्रा आपो नक्तन्ददृश्रे छायायै चाऽऽतपतश्च सन्धौ गृह्णात्यहोरात्रयोरेवास्मै वर्णङ्गृह्णाति हविष्मतीरिमा आप इत्याह हविष्कृतानामेव गृह्णाति हविष्माꣳ अस्तु ॥ [९] ॥ सूर्य इत्याह सशुक्राणामेव गृह्णात्यनुष्टुभा गृह्णाति वाग्वा अनुष्टुग् वाचैवैनाः सर्वया गृह्णाति चतुष्पदयर्चा गृह्णाति त्रिः सादयति सप्त सम्पद्यन्ते सप्तपदा शक्करी पशवः शक्करी पशूनेवाव रुन्धेऽस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद् गार्हपत्य उपसादयेदस्मिँल्लोके पशुमान्थ् स्याद् यदाहवनीयेऽमुष्मिँ ॥ [१०] ॥ ल्लोके पशुमान्थ् स्यादुभयोरुप सादयत्युभयोरेवैनँल्लोकयोः पशुमन्तङ्करोति सर्वतः परि हरति रक्षसामपहत्या इन्द्राग्नियोर् भागधेयीः स्थेत्याह यथायजुरेवैतदाग्नीध्र उप वासयत्येतद्वै यज्ञस्यापराजितय्यँदाग्नीध्रय्यँदेव

यज्ञस्यापराजितन्तदेवैना उप वासयति यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञꣳ रख्षाꣳस्यव चरन्ति यद् वहन्तीनाङ्गृह्णाति क्रियमाणमेव तद् यज्ञस्य शये रख्षसामनन्ववचाराय न ह्येता ईलयन्त्या तृतीयसवनात् परि शेरे यज्ञस्य सन्तत्यै ॥ [११] ॥

(स्या दिन्द्रो गृह्णीया दस्त्व मुष्मिन् क्रियते षड्विꣳशतिश्च) ॥ २ ॥

ब्रह्मवादिनो वदन्ति स त्वा अद्ध्वर्युः स्याद्यः सोममुपावहरन्थ् सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह देवेभ्य एवैतेन करोत्येतावतीर् वै देवतास्ताभ्य एवैनꣳ सर्वाभ्य उपावहरति पुरा वाचः ॥ [१२] ॥ प्रवदितोः प्रातरनुवाकमुपाकरोति यावत्येव वाक् तामव रुन्धेऽपोऽग्रेऽभिव्याहरति यज्ञो वा आपो यज्ञमेवाभि वाचंवि सृजति सर्वाणि छन्दाꣳस्यन्वाह पशवो वै छन्दाꣳसि पशूनेवाव रुन्धे गायत्रिया तेजस्कामस्य परि दध्यात् त्रिष्टुभेन्द्रियकामस्य जगत्या पशुकामस्यानुष्टुभा प्रतिष्ठाकामस्य पङ्क्त्या यज्ञकामस्य विराजाऽन्नकामस्य शृणोत्वग्निः समिधा हवं ॥ [१३] ॥ म इत्याह सवितृप्रसूत एव देवताभ्यो निवेद्यापोऽच्छैत्यप इष्य होतरित्याहेषितꣳ हि कर्म क्रियते मैत्रावरुणस्य चमसाद्ध्वर्यवा द्रवेत्याह मित्रावरुणौ वा अपान्नेतारौ ताभ्यामेवैना अच्छैति देवीरापो अपान्नपादित्याहाऽऽ*हुत्यैवैना निष्क्रीय गृह्णात्यथो हविष्कृतानामेवाभिघृतानाङ्गृह्णाति ॥ [१४] ॥ कार्षिरसीत्याह शमलमेवाऽऽसामप प्लावयति समुद्रस्य वोऽख्षित्या उन्नय इत्याह तस्माद्द्यमानाः पीयमाना आपो न ख्षीयन्ते योनिर् वै यज्ञस्य चात्वालंय्यँज्ञो वसतीवरीर्होतृचमसञ्च मैत्रावरुणचमसञ्च सꣳस्पर्श्य वसतीवरीर् व्यानयति यज्ञस्य सयोनित्वायाथो स्वादेवैना योनेः प्र जनयत्यद्ध्वर्योऽवेरपा(३) इत्याहोते मनन्नमुरुतेमाः पश्येति वावैतदाह यद्यग्निष्टोमो जुहोति यद्युक्थ्यः परिधौ नि मार्ष्टि यद्यतिरात्रो यजुर् वदन् प्र पद्यते यज्ञक्रतूनांव्यँावृत्त्यै ॥ [१५] ॥

(वाचो हवं मभिघृतानाङ्गृह्णात्यु त पञ्चविꣳशतिश्च) ॥ ३ ॥

देवस्य त्वा सवितुः प्रसव इति ग्रावाणमा दत्ते प्रसूत्या अश्विनोर् बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्ताम्पूष्णो हस्ताभ्यामित्याह यत्यै पशवो वै सोमो व्यान उपाꣳशुसवनो यदुपाꣳशुसवनमभि मिमीते व्यानमेव पशुषु दधातीन्द्राय त्वेन्द्राय त्वेति मिमीत इन्द्राय हि सोम आह्रियते पञ्च कृत्वो यजुषा मिमीते ॥ [१६] ॥ पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पञ्च कृत्वस्तूष्णीन्दश सम्पद्यन्ते दशाक्षरा विराडन्नंविराड् विराजैवान्नाद्यमव रुन्धे श्वात्राः स्थ वृत्रतुर इत्याहैष वा अपाꣳ सोमपीथो य एवँव्वेद नाप्स्वार्तिमार्च्छति यत् ते सोम दिवि ज्योतिरित्याहैभ्य एवैनं ॥ [१७] ॥ ल्ँलोकेभ्यः सम्भरति सोमो वै राजा दिशोऽभ्यध्यायत् स दिशोऽनु प्राविशत् प्रागपागुदगधरागित्याह दिग्भ्य एवैनꣳ सम्भरत्यथो दिश एवास्मा अव रुन्धेऽम्ब नि ष्वरेत्याह कामुका एनꣳ स्त्रियो भवन्ति य एवँव्वेद यत् ते सोमादाभ्यन्नाम जागृवीत्या ॥ [१८] ॥ हैष वै सोमस्य सोमपीथो य एवँव्वेद न सौम्यामार्तिमार्च्छति घ्नन्ति वा एतथ् सोमय्ँयदभिषुण्वन्त्यꣳशूनप गृह्णाति त्रायत एवैनम्प्राणा वा अꣳशवः पशवः सोमोऽꣳशून् पुनरपि सृजति प्राणानेव पशुषु दधाति द्वौद्वावपि सृजति तस्माद् द्वौद्वौ प्राणाः ॥ [१९] ॥

(यजुषा मिमीत एनं जागृवीति चतुश्चत्वारिꣳशच्च) ॥ ४ ॥

प्राणो वा एष यदुपाꣳशुर् यदुपाꣳश्वग्रा ग्रहा गृह्यन्ते प्राणमेवानु प्र यन्त्यरुणो ह स्माऽऽ*हौपवेशिः प्रातस्सवन एवाहय्ँयज्ञꣳ सꣳस्थापयामि तेन ततः सꣳस्थितेन चरामीत्यष्टौ कृत्वोऽग्रेऽभि षुणोत्यष्टाक्षरा गायत्री गायत्रम्प्रातस्सवनम्प्रातस्सवनमेव तेनाऽऽप्नोत्येकादश कृत्वो द्वितीयमेकादशाक्षरा त्रिष्टुप् त्रैष्टुभम्माध्यन्दिनꣳ ॥ [२०] ॥ सवनम्माध्यन्दिनमेव सवनन्तेनाऽऽप्नोति द्वादश कृत्वस्तृतीयन्द्वादशाक्षरा जगती जागतं तृतीयसवनन्तृतीयसवनमेव तेनाऽऽप्नोत्येताꣳ ह वाव स यज्ञस्य सꣳस्थितिमुवाचास्कन्दायास्कन्नꣳ हि तद्यद्यज्ञस्य सꣳस्थितस्य स्कन्दत्यथो खल्वाहुर् गायत्री वाव प्रातस्सवने नातिवाद इत्यनतिवादुक एनम्भ्रातृव्यो भवति य एवँव्वेद तस्मादष्टावष्टौ ॥ [२१] ॥ कृत्वोऽभिषुत्यम्ब्रह्मवादिनो वदन्ति पवित्रवन्तोऽन्ये ग्रहा गृह्यन्ते किम्पवित्र उपाꣳशुरिति वाक्पवित्र इति ब्रूयाद्वाचस्पतये पवस्व वाजिन्नित्याह वाचैवैनम्पवयति वृष्णो अꣳशुभ्यामित्याह वृष्णो ह्येतावꣳशू यौ सोमस्य गभस्तिपूत

इत्याह गभस्तिना ह्येनम्प्रवयति देवो देवानाम्पवित्रमसीत्याह देवो ह्येष ॥ [२२] ॥ सन् देवा-
नाम्पवित्रय्ँयेषाम्भागोऽसि तेभ्यस्त्वेत्याह येषाꣳ ह्येष भागस्तेभ्य एनं गृह्णाति स्वाङ्कृतोऽसीत्याह
प्राणमेव स्वमकृत मधुमतीर् न इषस्कृधीत्याह सर्वमेवास्मा इदꣳ स्वदयति विश्वेभ्यस्त्वेन्द्रियेभ्यो
दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु प्राणान् दधाति मनस्त्वा ॥ [२३] ॥
ऽष्ट्वित्याह मन एवाश्ञ्जत उर्वन्तरिख्षमन्विहीत्याहान्तरिख्षदेवत्यो हि प्राणः स्वाहा त्वा
सुभवः सूर्यायेत्याह प्राणा वै स्वभवसो देवास्तेष्वेव परोख्षञ्जुहोति देवेभ्यस्त्वा मरीचिपेभ्य
इत्याहाऽऽदित्यस्य वै रश्मयो देवा मरीचिपास्तेषान्तद् भागधेयन्तानेव तेन प्रीणाति यदि
कामयेत वर्षुकः पर्जन्यः ॥ [२४] ॥ स्यादिति नीचा हस्तेन नि मृज्याद्वृष्टिमेव नि यच्छति
यदि कामयेतावर्षुकः स्यादित्युत्तानेन नि मृज्याद्वृष्टिमेवोद्यच्छति यद्यभिचरेदमुञ्जह्यथ त्वा
होष्यामीति ब्रूयादाहुतिमेवैनम्प्रेप्सन् हन्ति यदि दूरे स्यादा तमितोस्तिष्ठेत् प्राणमेवास्यानुगत्य
हन्ति यद्यभिचरेदमुष्य ॥ [२५] ॥ त्वा प्राणे सादयामीति सादयेदसन्नो वै प्राणः प्राणमेवास्य
सादयति षड्भिरꣳशुभिः पवयति षड् वा ऋतव ऋतुभिरेवैनम्पवयति त्रिः पवयति त्रय इमे
लोका एभिरेवैनंल्लोकैः पवयति ब्रह्मवादिनो वदन्ति कस्माथ् सत्यात् त्रयः पशूनाꣳ हस्तादाना
इति यत् त्रिरुपाꣳशुꣳ हस्तेन विगृह्णाति तस्मात् त्रयः पशूनाꣳ हस्तादानाः पुरुषो हस्ती
मर्कटः ॥ [२६] ॥

(माद्ध्यन्दिन मष्टावष्टा वेष मनस्त्वा पर्जन्यो ऽमुष्य पुरुषो द्वे च) ॥ ५ ॥

देवा वै यद् यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा उपाꣳशौ यज्ञꣳ सꣳस्थाप्यमपश्यन् तमु-
पाꣳशौ समस्थापयन् तेऽसुरा वज्रमुद्यत्य देवानभ्यायन्त ते देवा बिभ्यत इन्द्रमुपाधावन् तानि-
न्द्रोऽन्तर्यामेणान्तरधत्त तदन्तर्यामस्यान्तर्यामत्वय्ँयदन्तर्यामो गृह्यते भ्रातृव्यानेव तद् यजमा-
नोऽन्तर् धत्तेऽन्तस्ते ॥ [२७] ॥ दधामि द्यावापृथिवी अन्तरुर्वन्तरिख्षमित्याहैभिरेव लोकैर्
यजमानो भ्रातृव्यानन्तर् धत्ते ते देवा अमन्यन्तेन्द्रो वा इदमभूद्यद् वयꣳ स्म इति तेऽब्रुवन्
मघवन्ननु न आ भजेति सजोषा देवैरवरैः परैश्चेत्यब्रवीद्ये चैव देवाः परे ये चावरे तानु-
भया ॥ [२८] ॥ नन्वाभजथ् सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चावरे तानुभया-

नन्वाभजत्यन्तर्यामे मघवन् मादयस्वेत्याह यज्ञादेव यजमानन्नान्तरेत्युपयामगृहीतोऽसीत्याहा
पानस्य धृत्यै यदुभावपवित्रौ गृह्येयाताम्प्राणमपानोऽनु न्यृच्छेत् प्रमायुकः स्यात् पवित्रवानन्त-
र्यामो गृह्यते ॥ [२९] ॥ प्राणापानयोर् विधृत्यै प्राणापानौ वा एतौ यदुपाꣳश्वन्तर्यामौ व्यान
उपाꣳशुसवनो यं कामयेत प्रमायुकः स्यादित्यसꣳस्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ
वि च्छिनत्ति ताजक् प्र मीयते यङ्कामयेत सर्वमायुरियादिति सꣳ स्पृष्टौ तस्य सादयेद्व्यानेनैवास्य
प्राणापानौ सन्तनोति सर्वमायुरेति ॥ [३०] ॥

(त उभयान् गृह्यते चतुश्चत्वारिꣳशच्च) ॥ ६ ॥

वाग्वा एषा यदैन्द्रवायवो यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानु प्र यन्ति वायुन्देवा
अब्रुवन्थ् सोमꣳ राजानꣳ हनामेति सोऽब्रवीद् वरँव्वृणै मदग्रा एव वो ग्रहा गृह्यान्ता इति
तस्मादैन्द्रवायवाग्रा ग्रहा गृह्यन्ते तमघ्नन्थ् सोऽपूयत् तन्देवा नोपाधृष्णुवन् ते वायुमब्रुवन्निमन्नः
स्वदये ॥ [३१] ॥ ति सोऽब्रवीद् वरँव्वृणै मद्देवत्यान्येव वः पात्राण्युच्यान्ता इति तस्मान्ना-
नादेवत्यानि सन्ति वायव्यान्युच्यन्ते तमेभ्यो वायुरेवास्वदयत् तस्मा द्यत् पूयति तत् प्रवाते
वि षजन्ति वायुर्हि तस्य पवयिता स्वदयिता तस्य विग्रहणन्नाविन्दन्थ् साऽदितिरब्रवीद् वर-
ँव्वृणा अथ मया वि गृह्णीद्ध्वम्मद्देवत्या एव वः सोमाः ॥ [३२] ॥ सन्ना असन्नित्युपयामगृ-
हीतोऽसीत्याहादितिदेवत्यास्तेन यानि हि दारुमयाणि पात्राण्यस्यै तानि योनेः संभूतानि यानि
मृन्मयानि साख्षात् तान्यस्यै तस्मादेवमाह वाग्वै पराच्यव्याकृताऽवदत् ते देवा इन्द्रमब्रुवन्नि-
मान्नो वाचवँव्याकुर्विति सोऽब्रवीद् वरँव्वृणै मह्यञ्चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्र-
वायवः सह गृह्यते तामिन्द्रो मद्ध्यतोऽवक्रम्य व्याकरोत् तस्मादियवँव्याकृता वागुद्यते तस्माथ्
सकृदिन्द्राय मद्ध्यतो गृह्यते द्विर् वायवे द्वौ हि स वरावृणीत ॥ [३३] ॥

(स्वदय सोमाः सहा ष्टाविꣳशतिश्च) ॥ ७ ॥

मित्रन्देवा अब्रुवन्थ् सोमꣳ राजानꣳ हनामेति सोऽब्रवीन्नाहꣳ सर्वस्य वा अहम्मित्रमस्मीति
तमब्रुवन्हनामैवेति सोऽब्रवीद् वरँव्वृणै पयसैव मे सोमꣳ श्रीणन्निति तस्मान् मैत्रावरुणम्पयसा

श्रीणन्ति तस्मात् पशवोऽपाक्रामन् मित्रः सन् क्रूरमकरिरिति क्रूरमिव खलु वा एषः ॥ [३४] ॥ करोति यः सोमेन यजते तस्मात् पशवोऽप क्रामन्ति यन्मैत्रावरुणम्पयसा श्रीणाति पशुभिरेव तन्मित्रꣳ समर्द्धयति पशुभिर् यजमानम्पुरा खलु वावैवम्मित्रोऽवेदप मत् क्रूरञ्चक्रुषः पशवः क्रमिष्यन्तीति तस्मादेवमवृणीत वरुणन्देवा अब्रुवन् त्वयाऽꣳशभुवा सोमꣳ राजानꣳ हनामेति सोऽब्रवीद् वरँव्वृणै मह्यञ्चै ॥ [३५] ॥ वैष मित्राय च सह गृह्याता इति तस्मान्मैत्रावरुणः सह गृह्यते तस्माद् राज्ञा राजानमꣳशभुवा घ्नन्ति वैश्येन वैश्यꣳ शूद्रेण शूद्रन्न वा इदन्दिवा न नक्तमासीदव्यावृत्तन्ते देवा मित्रावरुणावब्रुवन्निदन्नो वि वासयतमिति तावब्रूताँव्वरँव्वृणावहा एक एवाऽऽवत् पूर्वो ग्रहो गृह्याता इति तस्मादैन्द्रवायवः पूर्वो मैत्रावरुणाद्गृह्यते प्राणापानौ ह्येतौ यदुपाꣳश्वन्तर्यामौ मित्रोऽहरजनयद्वरुणो रात्रिन्ततो वा इदँव्यौच्छद्यन्मैत्रावरुणो गृह्यते व्युष्ट्यै ॥ [३६] ॥

(एष चैन्द्रवायवो द्वाविꣳशतिश्च) ॥ ८ ॥

यज्ञस्य शिरोऽच्छिद्यत ते देवा अश्विनावब्रुवन् भिषजौ वै स्थ इदँय्यज्ञस्य शिरः प्रति धत्त-मिति तावब्रूताँव्वरँव्वृणावहै ग्रह एव नावत्रापि गृह्यतामिति ताभ्यामेतमाश्विनमगृह्णन् ततो वै तौ यज्ञस्य शिरः प्रत्यधत्ताँय्यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै तौ देवा अब्रुवन्नपूतौ वा इमौ मनु-ष्यचरौ ॥ [३७] ॥ भिषजाविति तस्माद् ब्राह्मणेन भेषजन्न कार्यमपूतो ह्ये(१)षोऽमेद्ध्यो यो भिषक्तौ बहिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन् तस्माद् बहिष्पवमाने स्तुत आश्विनो गृह्यते तस्मादेवँव्विदुषा बहिष्पवमान उपसद्यः पवित्रँव्वै बहिष्पवमान आत्मानमेव पवयते तयोस्त्रेधा भैषज्यँव्वि न्यदधुरग्नौ तृतीयमप्सु तृतीयम्ब्राह्मणे तृतीयन्तस्मादुदपात्र ॥ [३८] ॥ मुपनिधाय ब्राह्मणन्दक्षिणतो निषाद्य भेषजङ्कुर्याद् यावदेव भेषजन्तेन करोति समर्द्धुकमस्य कृतम्भवति ब्रह्मवादिनो वदन्ति कस्मात्सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति यदेकपात्रा गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो द्विपात्रा हूयन्ते तस्माद् द्वौद्वौ बहिष्टात् प्राणाः प्राणा वा एते यद् द्विदेवत्याः पशव इडा यदिडाम्पूर्वान्द्विदेवत्येभ्य उपह्वयेत ॥ [३९] ॥ पशुभिः प्राणानन्तर् दधीत प्रमायुकः स्याद् द्विदेवत्यान् भक्षयित्वेडामुप ह्वयते प्राणानेवाऽऽत्मन् धित्वा

पशूनुप ह्वयते वाग्वा ऐन्द्रवायवश्चक्षुर् मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवम्भक्षयति तस्मात् पुरस्ताद् वाचा वदति पुरस्तान्मैत्रावरुणन्तस्मात् पुरस्ताच्चक्षुषा पश्यति सर्वतः परि-हारमाश्विनन्तस्माथ् सर्वतः श्रोत्रेण श्रृणोति प्राणा वा एते यद् द्विदेवत्या ॥ [४०] ॥ अरिक्तानि पात्राणि सादयति तस्मादरिक्ता अन्तरतः प्राणा यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञꣳ रक्षाꣳसि स्यवं चरन्ति यदरिक्तानि पात्राणि सादयति क्रियमाणमेव तद् यज्ञस्य शये रक्ष-सामनन्ववचाराय दक्षिणस्य हविर्द्धानस्योत्तरस्याँव्वर्तन्याꣳ सादयति वाच्येव वाचन्दधात्या तृतीयसवनात् परि शेरे यज्ञस्य सन्तत्यै ॥ [४१] ॥

(मनुष्यचरा वृदपात्र मुपह्वयेत द्विदेवत्याः षड्चत्वारिꣳशाच्च) ॥ ९ ॥

बृहस्पतिर् देवानाम्पुरोहित आसीच्छण्डामर्का वसुराणाम्ब्रह्मण्वन्तो देवा आसन् ब्रह्मण्व-न्तोऽसुरा स्ते(१)ऽन्योऽन्यन्नाशक्नुवन्नभिभवितुन्ते देवाः शण्डामर्कावुपामन्त्रयन्त तावब्रूताँव्व-रँव्वृणावहै ग्रहावेव नावत्रापि गृह्येतामिति ताभ्यामेतौ शुक्रामन्थिनावगृह्णन् ततो देवा अभवन् पराऽसुरा यस्यैवँव्विदुषः शुक्रामन्थिनौ गृह्येते भवत्यात्मना परा ॥ [४२] ॥ ऽस्य भ्रातृव्यो भवति तौ देवा अपनुद्याऽऽत्मन इन्द्रायाजुहवुरपनुत्तौ शण्डामर्कौ सहामुनेति ब्रूयाद्यन्द्विष्या-द्यमेव द्वेष्टि तेनैनौ सहाप नुदते स प्रथमः संकृतिर् विश्वकर्मेत्येवैनावात्मन इन्द्रायाजुहवुरिन्द्रो ह्येतानि रूपाणि करिक्रदचरदसौ वा आदित्यः शुक्रश्चन्द्रमा मन्थ्यपिगृह्य प्राञ्चौ नि ॥ [४३] ॥ ष्क्रामतस्तस्मात् प्राञ्चौ यन्तौ न पश्यन्ति प्रत्यञ्चावावृत्य जुहुतस्तस्मात् प्रत्यञ्चौ यन्तौ पश्यन्ति चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ नासिकोत्तरवेदिरभितः परिक्रम्य जुहुतस्तस्मादभितो नासिकाञ्चक्षुषी तस्मान्नासिकया चक्षुषी विधृते सर्वतः परि क्रामतो रक्षसामपहत्यै देवा वै याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन् ताꣳ स्ताभिः प्र ॥ [४४] ॥ णुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन् ताꣳ स्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यञ्चौ शुक्रा-मन्थिनौ पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान् प्र णुदते तस्मात् पराचीः प्रजाः प्र वीयन्ते प्रतीचीर् जायन्ते शुक्रामन्थिनौ वा अनु प्रजाः प्र जायन्तेऽत्तीश्चाद्याश्च सुवीराः प्रजाः प्रज-नयन् परीहि शुक्रः शुक्रशोचिषा ॥ [४५] ॥ सुप्रजाः प्रजाः प्रजनयन् परीहि मन्थी मन्थि-

शोचिषेत्याहैता वै सुवीरा या अत्त्रीरेताः सुप्रजा या आद्या य एवंवेदात्त्यस्य प्रजा जायते नाऽऽद्याँ प्रजापतेरक्ष्यश्वयत् तत् पराऽऽपतत् तद् विकङ्कतम्प्राविशत् तद् विकङ्कते नारमत तद् यवम्प्राविशत् तद् यवेऽरमत तद् यवस्य ॥ [४६] ॥ यवत्वय्यँद् वैकङ्कतम्मन्थिपात्रम्भवति सक्तुभिः श्रीणाति प्रजापतेरेव तच्चक्षुः सम्भरति ब्रह्मवादिनो वदन्ति कस्माँथ् सत्यान्मन्थिपात्रꣳ सदो नाश्नुते इत्यार्तपात्रꣳ हीति ब्रूयाद् यदश्नुवीतान्धोऽध्वर्युः स्यादार्तिमाच्छेत् तस्मान्नाश्नुते ॥ [४७] ॥

(आत्मना परा नि ष्म शुक्रशोचिषा यवस्य सप्तत्रिꣳशाच्च) ॥ १० ॥

देवा वै यद् यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा आग्रयणाग्रान् ग्रहानपश्यन् तानगृह्णत ततो वै तेऽग्रम्पर्यायन्यस्यैवंविदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानाम्पर्येति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयाद्भ्रातृव्यस्यैव रुक्त्वाऽग्रꣳ समानानाम्पर्येति ये देवा दिव्येकादश स्थेत्याह ॥ [४८] ॥ तावतीर् वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येष देवतया वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना ते देवा वाच्यपक्रान्तायान्तूष्णीङ्ग्रहानगृह्णत साऽमन्यत वागन्तर् यन्ति वै मेति साऽऽग्रयणम्प्रत्यागच्छत् तदाग्रयणस्याऽऽग्रयणत्वं ॥ [४९] ॥ तस्मादाग्रयणे वाग्वि सृज्यते यत् तूष्णीम्पूर्वे ग्रहा गृह्यन्ते यथा त्सारीयति म आख इयति नाप राथ्स्यामीत्युपावसृजत्येवमेव तदध्वर्युराग्रयणङ्गृहीत्वा यज्ञमारभ्य वाचव्वि सृजते त्रिर्हिङ्करोत्युद्गातृनेव तद् वृणीते प्रजापतिर् वा एष यदाग्रयणो यदाग्रयणङ्गृहीत्वा हिंकरोति प्रजापतिरेव ॥ [५०] ॥ तत् प्रजा अभि जिघ्रति तस्माद् वथ्सञ्जातङ्गौरभि जिघ्रत्यात्मा वा एष यज्ञस्य यदाग्रयणः सवनेसवनेऽभि गृह्णात्यात्मन्नेव यज्ञꣳ सन्तनोत्युपरिष्टादा नयति रेत एव तद् दधात्यधस्तादुप गृह्णाति प्र जनयत्येव तद्ब्रह्मवादिनो वदन्ति कस्माँथ् सत्याद्गायत्री कनिष्ठा छन्दसाꣳ सती सर्वाणि सवनानि वहतीत्ये ष वै गायत्रियै वथ्सो यदाग्रयणस्तमेव तदभिनिवर्तꣳ सर्वाणि सवनानि वहति तस्माद् वथ्समपाकृतङ्गौरभि नि वर्तते ॥ [५१] ॥

(आहाऽऽ ग्रयणत्वं प्रजापतिरेवे ति विꣳशतिश्च) ॥ ११ ॥

समाप्ति कोर्वैः

(य॒ज्ञेन॒ ता उ॑प॒यड्भि॑र् दे॒वा वै य॒ज्ञमाग्नी᳚ध्रे ब्रह्मवा॒दिन॒ः स त्वैदे॒वस्य॒ ग्रावा॑णंप्रा॒णो वा उ॑पा॒ꣳ॒शुश्च॑ग्रा दे॒वा वा उ॑पा॒ꣳ॒शौ वाग्वै मि॒त्रं य॒ज्ञस्य॒ बृ॒हस्पति॑र् दे॒वा वा आ᳚ग्रय॒णाग्रा॒ नेका॑दश)

(य॒ज्ञेन॑ लो॒के प॑शु॒मान्थ् स्या॒थ् सव॑न॒म्माध्य॑न्दि॒नं वाग्वा अरि॑क्तानि॒ तत् प्र॒जा एक॑पञ्चा॒शत्)

(य॒ज्ञेन॒ नि व॑र्तते)

॥ हरिः ॐ ॥

षष्ठकाण्डे चतुर्थः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
११	५१

ॐ